શ્રી દધિવામનસ્તોત્રમ

હેમાદ્રિશિખરાકારં શુદ્ધસ્ફટિકસન્નિભમ ।
પૂર્ણચન્દ્રનિભં દેવં દ્વિભુજં વામનં સ્મરેત ॥૧॥

પદ્માસનસ્થં દેવેશં ચન્દ્રમણ્ડલમધ્યગમ।
જ્વલત્કાલાનલપ્રખ્યં તડિત્કોટિસમપ્રભમ ॥૨॥

સુર્યકોટિપ્રતીકાશં ચન્દ્રકોટિસુશીતલમ।
ચન્દ્રમણ્ડલમધ્યસ્થં વિષ્ણુમવ્યયમચ્યુતમ ॥૩॥

શ્રીવત્સકૌસ્તુભોરસ્કં દિવ્યરત્નવિભૂષિતમ।
પીતાંબરમુદારાઙ્ગં વનમાલાવિભૂષિતમ ॥૪॥

સુન્દરં પુણ્ડરીકાક્ષં કિરીટેન વિરાજિતમ।
ષોડશસ્ત્રીયુતં સંચગપ્સરોગણસેવિતમ॥૫॥

ઋગ્યજુસ્સામાથર્વાધૈઃ ગીયમાનં જનાર્દનમ।
ચતુર્મુખાધૈઃ દેવેશૈઃ સ્તોત્રારાધનતત્પરૈઃ ॥૬॥

સનકાદ્યૈઃ મુનિગણૈઃ સ્તૂયમાનમહર્નિશમ।
ત્રિયંબકો મહાદેવો નૃત્યતે યસ્ય સન્નિધૌ॥૭॥

દધિમિશ્રાન્નકવલં રુકમપાત્રં ચ દક્ષિણે।
કરે તુ ચિન્તયેદ્વામે પીયૂષમમલં સુધીઃ ॥૮॥

સાધકાનામ પ્રયચ્છન્તં અન્નપાનમનુત્તમમ।
બ્રાહ્મે મુહૂર્તેચોત્થાય ધ્યાયેદ્દેવમધોક્ષજમ ॥૯॥

અતિસુવિમલગાત્રં રુકમપાત્રસ્થમન્નમ
સુલલિતદધિભાણ્ડં પાણિના દક્ષિણેન ।
કલશમમૃતપૂર્ણં વામહસ્તે દધાનં
તરતિ સકલદુઃખાન વામનં ભાવયેદ્યઃ ॥૧૦॥
ક્ષીરમન્નમન્નદાતા લભેદન્નાદ એવ ચ।
પુરસ્તાદન્નમાપ્નોતિ પુનરાવર્તિવર્જિતમ ॥૧૧॥

આયુરારોગ્યમૈશ્વર્યં લભતે ચાન્નસંપદઃ।
ઈદં સ્તોત્રં પઠેદ્યસ્તુ પ્રાતઃકાલે દ્વિજોત્તમઃ ॥૧૨॥

અકલેશાદન્નસિધ્યર્થં જ્ઞાનસિધ્યર્થમેવ ચ।
અભ્રશ્યામઃ શુદ્ધયજ્ઞોપવીતી સત્કૌપીનઃ પીતકૃષ્ણાજિનશ્રીઃ
છ્ત્રી દણ્ડી પુણ્ડરીકાયતાક્ષઃ પાયાદ્દેવો વામનો બ્રહ્મચારી ॥૧૩॥

અજિનદણ્ડકમણ્ડલુમેખલારુચિરપાવનવામનમૂર્તયે।
મિતજગત્ત્રિતયાય જિતારયે નિગમવાક્પટવે વટવે નમઃ॥૧૪॥

શ્રીભૂમિસહિતં દિવ્યં મુકતામણિવિભૂષિતમ।
નમામિ વામનં વિષ્ણું ભુક્તિમુક્તિફલપ્રદમ ॥૧૫॥

વામનો બુદ્ધિદાતા ચ દ્રવ્યસ્થો વામનઃ સ્મૃતઃ।
વામનસ્તારકોભાભ્યાં વામનાય નમો નમઃ ॥૧૬॥